# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-२ ( Sem_4 )** **प्रश्नपत्र-५** **गुणा: - ७०**

**विषय: - स्वामिनारायणवेदान्त: ( S )** CC 2.4.7 **समय: - ०३:०० त: ०६:००**

**दिनाङ्क: - २२-०४-२०१६** **सन्दर्भग्रन्थ: - मुण्डक-माण्डूक्योपनिषदौ**

---

## युनिट-१

**प्रश्न: -१ अधस्तनेषु कयोरपि द्वयो: श्लोकयो: ससन्दर्भ प्रसङ्गं व्याख्या कार्या ।** ०८

*(१) तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।*
*अन्नात् प्राणो मन: सत्यं लोका: कर्मसु चामृतम् ॥*

*(२) तस्मै स विद्वान् उपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय ।*
*येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥*

*(३) यथोर्णनाभि: सृजते गृह्णते च यथा पृथिव्यामोषधय: सम्भवन्ति ।*
*यथा सत: पुरुषात् केशलोमानि तथाऽक्षरात् सम्भतीह विश्वम् ॥*

**प्रश्न: -२ कस्याप्येकस्य विस्तारं कुरुत ।** ०८

*(१) विद्याद्वयम् ।*

*(२) ब्रह्मविद्याऽध्यापकगुरुलक्षणानि ।*

**प्रश्न: -३ एकां टिप्पणीं लिखत ।** ०२

*(१) अन्धेनैव नीयमाना यथान्धा: ।* *(२) तप: श्रद्धे ये ह्युपवसत्यचये ?*

**प्रश्न: -४ द्वयो: लघूत्तरं लिखत ।** ०२

*(१) मुण्डकोपनिषत् कस्मिन् वेदेऽन्तर्हिता ?*

*(२) 'नाकस्य' इत्यस्य कोऽर्थ: ?*

*(३) वेदाङ्गानि कानि ?*

*(४) अङ्गिर्नामा मुनि: कस्मै ब्रह्मविद्यां प्राह ?*

## युनिट-२

**प्रश्न: -५ अधस्तनेषु कयोरपि द्वयो: श्लोकयो: ससन्दर्भ प्रसङ्गं व्याख्या कार्या ।** ०८

*(१) न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युता भान्ति कुतोऽयमग्नि: ।*
*तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥*

*(२) दिव्यो ह्यमूर्त: पुरुष: स बाह्याभ्यन्तरो ह्यज: ।*
*अप्राणो ह्यमना: शुभ्रो ह्यक्षरात्परत: पर: ॥*

*(३) प्राणो ह्येष सर्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी ।*
*आत्मक्रीड आत्मरति: क्रियावानेष ब्रह्मविदां वरिष्ठ: ॥*

**प्रश्नः -६ कस्याप्येकस्य विस्तारं कुरुत ।** ०८

*(१) परब्रह्ममाहात्म्यम् । (२) परमात्मसाक्षात्कारसाधनानि ।*

**प्रश्नः -७ द्वयोः टिप्पणीं लिखत ।** ०४

*(१) पावकदृष्टान्तेनाऽक्षरब्रह्म माहात्म्यम् । (२) अक्षरब्रह्म वेद्धव्यम् ।*

*(३) नायमात्मा बलहीनेन लभ्यः । (४) परात्परं पुरुषमुपैति दिव्यम् ।*

**प्रश्नः -८ पञ्चानां लघूत्तरं लिखत ।** ०५

*(१) किं नाम 'संन्यासयोगात्' ?*

*(२) किं नाम 'ज्ञानप्रसादेन'?*

*(३) 'शुक्रमेतदतिवर्तन्ति धीराः' इत्यत्र शुक्रशब्दस्य कति अर्थाः ?*

*(४) सर्वे संशयाः कदा छिद्यन्ते ?*

*(५) कः शचति ?*

*(६) मनोमयः प्राणशरीरनेता कः ?*

*(७) भाष्यकारस्य गुरोः नाम किम् ?*

## युनिट-३

**प्रश्नः -९ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गं भावार्थो लेख्यः ।** ०८

*(१) सर्वं ह्येतद् ब्रह्माऽयमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ।*

*(२) सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ।*

*(३) अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद य एवं वेद ।*

**प्रश्नः -१० कस्याप्येकस्य विस्तारं कुरुत ।** ०८

*(१) जीवात्मनस्तुर्याऽवस्था । (२) प्रथमः पादः ।*

**प्रश्नः -११ टिप्पणीद्वयं लिखत ।** ०४

*(१) जीवस्य जाग्रदवस्था । (२) द्वितीयः पादः ।*

*(३) तृतीयः पादः । (४) प्राज्ञमकारयोरैक्यम् ।*

**प्रश्नः -१२ पञ्चानां लघूत्तरं लिखत ।** ०५

*(१) माण्डूक्योपनिषत् कस्मिन् वेदे निहिता ?*

*(२) माण्डूक्योपनिषदि कति मन्त्राः ?*

*(३) उकारः कस्य द्वितीया मात्रा ?*

*(४) जाग्रदवस्थायां को गुणः प्रधानः ?*

*(५) 'चेतोमुखः' इत्यस्य कोऽर्थः ?*

*(६) अकारस्य ऐक्यं केन सह ?*

*(७) 'अब्रह्मविद्' नाम किम् ?*

----------------------